# Bhriguproktam Shivadharmamahimanuvarnanam

# ભૃગુપ્રોક્તં શિવધર્મમહિમાનુવર્ણનમ્

## Document Information

Text title : Bhriguproktam Shivadharmamahimanuvarnanam

File name : bhRRiguproktaMshivadharmamahimAnuvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 42 | 158-169 ||

Latest update : February 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

Bhriguproktam Shivadharmamahimanuvarnanam

# ભૃગુપ્રોક્તં શિવધર્મમહિમાનુવર્ણનમ્

- ભૃગુયમસંવાદે -

ભૃગુઃ -

શિવધર્મસમાનધર્મમન્યં ન વિજાનામિ ન વેદબોધિતોઽપિ ।
સ તુ ધર્મબરઃ સ એવ ધર્મઃ સ સુરાણામપિ સેવનીય એવ ॥ ૧૫૮॥

સુરૈરપારૈઃ શિવધર્મધર્મો નારાયણાદ્યૈઃ કૃત એવ સર્વૈઃ ।
મુનીશ્વરૈરપ્યુરગેશ્વરૈશ્ચ સિદ્ધૈશ્ચ ગન્ધર્વવરૈશ્ચ નિત્યમ્ ॥ ૧૫૯॥

યં સર્વદેવોત્તમમામનન્તિ સોમાવતંસં ગિરિજાવૃતાંસમ્ ।
તં દારિતાપારનૃસિંહમાંસં વન્દે શિવામાનસરાજહંસમ્ ॥ ૧૬૦॥

યત્પાદુકારાધકસેવકાનાં પાદારવિન્દાન્યરવિન્દજાતઃ ।
ગોવિન્દવૃન્દારકવૃન્દમૌલિમૂલાનિ ચક્રે તમહં ભજામિ ॥ ૧૬૧॥

યસ્યૈશ્વર્યં માનગમ્યં ન નૂનં યં વેદાન્તા નૈવ જાનન્તિ સર્વે ।
તં દેવેશં પૂજયામિ પ્રભાતે મધ્યાહ્ને વા સાયમભ્યન્તરે વા ॥ ૧૬૨॥

યલ્લિઙ્ગાગ્રાદિન્દિરાકાન્તમુખ્યાઃ સર્વે દેવાસ્તાવદુત્પત્તિમાપુઃ ।
તં ત્યક્ત્વાઽન્યં કં વ્રજામઃ શરણ્યં તં દેવાનામગ્રગણ્યં ભજામિ ॥ ૧૬૩॥

યત્પાદાઙ્ગુલ્યગ્રરેખાભિજાતં ચક્રં વિષ્ણોર્ભૂષણં તં વરેણ્યમ્ ।
વન્દે ગૌરીકાન્તમેકં નિતાન્તં સ્વાન્તે શાન્તે સન્તતં સંવસન્તમ્ ॥ ૧૬૪॥

ન ભજામિ શિવાન્યમન્યવાર્તાં ન કરોમ્યેવ ન ધીરહારકણ્ઠઃ ।
સ કપર્દકપાલિકાસમેતો ભવતિ પ્રીતિવિશિષ્ટમાનસોઽપિ ॥ ૧૬૫॥

ન સ્વપ્નેઽપિ શિવાન્યનામકથને પ્રીતિઃ સુધાધારયા
પ્રીતઃ કાઞ્જિરમિચ્છતીતિ કુમતિઃ કો વા જગન્મણ્ડલે ।
નેન્દ્રોપેન્દ્રવિરિઞ્ચિનામકથને તત્પૂજને વા મતિઃ
સ્વપ્નેઽપીતિ શપામિ કાલ શિવયોઃ પાદારવિન્દે મુદા ॥ ૧૬૬॥

પૂજ્યઃ શઙ્કર એવ શઙ્કરકથા શ્રાવ્યા સદા શ્રૂયતે
શર્વારાધનમેવ સાધનવરૈઃ બિલ્વાદિભિઃ સાધ્યતે ।
નેયં સ્યાદનિશં વયોઽપિ સતતં તુઙ્ગાઙ્ગલિઙ્ગાર્ચનૈઃ
લિઙ્ગારાધનમેવ મે ધનમિતિ જ્ઞેયં નિધાનં પરમ્ ॥ ૧૬૭॥

ભસ્મોદ્ધૂલનપૂર્વકં સિતલસદ્ભૂત્યા ત્રિપુણ્ડ્રં મુહુઃ
ધૃત્વા ભાલતલે કપોલયુગલે રુદ્રાક્ષમાલામપિ ।
તં પઞ્ચાક્ષરમન્ત્રમેવ સતતં જપ્ત્વા શિવારાધનં
કૃત્વા બિલ્વદલૈર્વસામિ ભુવને જીવામિ યાવદ્ધ્યમ ॥

યલ્લોચનાઞ્ચલવિલોચનગાત્રપાતં તાવત્ પવિત્રમપિ મુક્તિપવિત્રગાત્રમ્ ।
તં ચિત્રભાનુનયનં શરણં વ્રજામિ માહેશ્વરામરતરું પરમેકમેવ ॥ ૧૬૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભૃગુપ્રોક્તં શિવધર્મમહિમાનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૪૨। ૧૫૮-૧૬૯ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 42. 158-169 ..

Proofread by Ruma Dewan

---

*Bhriguproktam Shivadharmamahimanuvarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*